ह्रीं जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।

नमस्तेस्तु हृषिकेश महापुरुषपूर्वज ॥ १ ॥

नमो हिरण्यगर्भाय प्रधानाव्यक्तरूपिणे ।

ह्रीं नमो वासुदेवाय शुद्धज्ञानस्वरूपिणे ॥ २ ॥

देवानां दानवानां च सामान्यमसि दैवतम् ।

सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥ ३ ॥

एकस्त्वमसि लोकस्य स्रष्टा संहारकस्तथा ।

अव्यक्तश्चानुमन्ता च गुणमायासमावृतः ॥ ४ ॥

संसारसागरं घोरमनन्तं क्लेशभाजनम् ।

त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥ ५ ॥

न ते रूपं न चाकारो नायुधानि चास्पदम् ।

तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥ ६ ॥

नैव किञ्चित्परोक्षं ते प्रत्यक्षोऽसि न कस्यचित् ।

नैव किञ्चिदसिद्धं ते न च सिद्धोऽसि कस्यचित् । ॥ ७ ॥

कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ।

योगिनां परमासिद्धिः परमं ते पदं विदुः ॥ ८ ॥

अहं भीतोऽस्मि देवेश संसारेऽस्मिन्भयावहे ।

त्राहि मां पुण्डरीकाक्ष न जाने शरणं परम् ॥ ९ ॥

कालेश्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ।

शरीरे च गृहे चापि वर्तते में महद्भयम् ॥१० ॥

त्वत्पादकमलादन्यन्न में जन्मान्तरेष्वपि ।

निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥११ ॥

विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमर्जितम् ।

जन्मान्तरेऽपि में देव माभूदस्य परिक्षयः ॥१२ ॥

दुर्गतावपि जातायां त्वं गतिस्त्वं मतिर्मम ।

यदि नाथं च(न) विन्देयं तावताऽस्मि कृती सदा ॥१३ ॥

अकामकलुषं चित्तं मम ते पादयोः स्थितम् ।

कामये विष्णुपादौ तु सर्वजन्मसु केवलम् ॥१४ ॥

पुरुषस्य हरेः सूक्तं स्वर्ग्यं धन्यं यज्ञस्करम् ।

आत्मज्ञानमिदं पुण्यं योगज्ञानमिदं परम् ॥१५ ॥

इत्येवमनया स्तुत्या स्तुत्वा देवं दिने दिने ।

किंकरोऽस्मीति चात्मानं देवायैव निवेदयेत् ॥१६ ॥

फलाहारो जपेन्मासं पश्यन्नात्मानमात्मनि ।

फलानि भुक्त्वोपवसेन्मासमद्भिश्च वर्तयेत् ॥१७ ॥

अरण्ये निवसेन्नित्यं जपन्निदमृषिः सदा ।

ऋग्भिस्त्रिवषणं काले यजेदप्सु समाहितः ॥१८ ॥

आदित्यमुपतिष्ठेत सूक्तेनानेन नित्यशः ।

आज्याहुतेनैव हुत्वा चिन्तयेदृ्ऋषिभिस्तथा ॥ १९ ॥

ऊर्ध्वं मासात्फलाहारस्त्रिभिर्वर्षैर्जपेदिदम् ।

तद्भक्तस्तन्मना युक्तो दशवर्षाण्यनन्यभाक् ॥ २० ॥

साक्षात्पश्यति तं देवं नारायणमनामयम् ।

ग्राह्यमत्यन्तयत्नेन स्त्रष्टारं जगतोऽव्ययम् ॥ २१ ॥

अथवा साधमानोऽपि भक्तिं न परिहापयेत् ।

भक्तानुकम्पी भगवाञ्जायते पुरुषोत्तमः ॥ २२ ॥

येन येन च कामेन जपेत् प्रयतः सदा ।

स स कामः समृद्धः स्याच्छ्रद्धधानस्य कुर्वतः ॥ २३ ॥

होमं वाऽप्यथवा जाप्यमुपहारमनुत्तमम् ।

कुर्वीत येन कामेन तत्सिद्धिमवधारयेत् ॥ २४ ॥

॥ इति श्रीपुराणोक्त पुरुषसूक्तम् ॥